**ARYAVART SHODH VIKAS PATRIKA**
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218 **PP. No.- 121-124**

ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-15, No.- IV, Issues-26, YEAR- Oct.-Dec.-2022

# वृत्तिविमर्शः

**रविशंकर पाण्डेय**

सहेयक प्रोफेसर– संस्कृत विद्या विभाग, संपूर्णानंद संस्कृत विश्वविद्यालय, वाराणसी, (उ0प्र0) भारत

Received-23.10.2022, Revised-28.10.2022, Accepted-01.11.2022 E-mail: ravishankarp333@gmail.com

***सारांशः*** *"'एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामन्धुग्भवति" सम्यक्ज्ञातत्वं सुप्रयोगात् इति अनुमानं कुर्वन्ति शास्त्रविचक्षणाः, आहोस्पित् सुप्रयुक्तः कामन्धुक् भवति, सुप्रयुक्तत्वं सम्यक् ज्ञानात् समायापति। शब्दे कल्पितप्रत्ययोः, तत्रविद्यमानानां वर्णानाम् उच्चारणस्थानयत्नमात्रादीनां ज्ञानमेव सम्यकज्ञातत्वमिति कथनमौचित्यं न भजते तत्र शब्दात् जायमानः अर्थोऽपि समाहितोऽस्ति। शब्दं ज्ञात्वा अर्थजिज्ञासा, अर्थं दृष्ट्वा शब्द–जिज्ञासा भवत्येव। शब्द–प्रमाणकाः वैयाकरणाः शब्दस्य नित्यत्वं मन्वमानाः शब्दात् अर्थानुसन्धानं कुर्वन्ति। अत्र 'सर्वे सर्वार्थवाचाकौ' इतिभाष्यवचनं महत्प्रासङ्गिकं प्रतीयते यतोहि–सति तात्पर्ये सर्वे शब्दाः सर्वान् अर्थान् बोधयन्ति, एवं सति घट इति शब्दः कम्बुग्रीवा–युक्तव्यक्तिं बोधयन् परमठादीनपि वोधयिष्यति तस्मात् लोकव्यवहारो व्याकुप्येत्। एतद् सर्वं समीक्ष्य अर्थ नियन्त्रणाय वृतेः आवश्यकता प्रतिपादिता शास्त्रकारैः।*

**कुंजीभूत शब्द– कामन्धुग्भवति, सम्यक्ज्ञातत्वं सुप्रयोगात्, शास्त्रविचक्षणाः, सम्यकज्ञातत्वमिति, कथनमौचित्यं, वैयाकरणाः।**

**परमलघुमञ्जूषायां वृत्तेरावश्यकतां प्रतिपादयन् प्रोवाच नागेश–** तद्धर्मावच्छिन्नविषयकशाब्दवुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्न– निरुपितवृत्तिविशिष्टज्ञानं हेतुः।' वृत्तिविशिष्टं ज्ञानं शाब्दवोधं प्रति हेतुः तस्मादेव शब्दस्य प्रमाजनकत्वे सर्वैः शब्दैः सर्वेषां श्रोतृणां बोधापत्ति न भवति। एवं सति घटशब्दोच्चारणे पटप्रत्ययो न भवति यतोहि घटत्वधमविच्छन्नघटविषयकशाब्दबोधं प्रति घटत्वधर्मावच्छिन्न– घटनिरुपिता वृतिः तद्विशिष्टं यद् ज्ञानं, तद्ज्ञानं हेतुरिति।

पटप्रत्यये तु पटत्वधर्मावच्छिन्ना पटनिरूपिता वृत्तिः अपेक्षिता भवति तस्मात्, घट इति समुच्चारणे पटस्यावबोधः नैव जायते। कस्य पुरुषस्य शाब्दबोधो न भवतीति प्रश्ने पञ्चतर्काः व्याकरणशास्त्रे समुपस्थापिताः सन्तिः– (1) प्रथमः– अगृहीतवृत्तिकस्य, द्वितीयः– विस्मृतवृत्तिकस्य, तृतीयः– तत्पदमजानतः, चतुर्थः– घटपदत्वेनोपस्थिताकाशस्य, जनकतयोपस्थितचैत्रादेश्च पञ्चमः। शाब्दबोधे वृत्तेरावश्यकता प्रतिपादिता। अत्र वृत्तिपदेन किं गृह्यते साहित्यिकानां मतमुपस्थाप्यतेः– काव्यप्रकाशकाराः मम्मटाः वृत्तिः व्यापाररूपा इति सिद्धान्तयन्ति। तत्र प्रोच्यते– शक्तिस्त्रिधा, अभिधालक्षणाः व्यञ्जनेति। 'स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिध ाोच्यते' इति काव्यप्रकाशस्थवाक्यस्य स्पष्टं तात्पर्यम् अभिधा व्यापाररुपेति। लक्षणाविषयेऽपि तत्रैव निगदितमस्ति–

**मुख्यार्थवाधे तद्योगे रुढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया।।**

लक्षणारोपिताक्रिया इत्यंशमादाय स्पष्टनिहितार्थः समायाति यत् लक्षणाव्यापाररुपेति। 'तत्र व्यापारोव्यञ्जनात्मकः' इति–वाक्येनापि व्यञ्जनायारपि' व्यापारस्वरूपत्वं सिद्धयति। यतः अभिधा–लक्षणा व्यञ्जना इमाः व्यापाररुपाः तस्मात् वृत्तिः व्यापारः इति कथनं सिद्धान्तरुपेण स्थापयितुं शक्यते।

न्यायशास्त्रमते शाब्दबोधानु कूलसम्बन्धत्वं वृत्तित्वं विद्यते। वृत्तिशब्दार्थस्तु–शक्तिलक्षणा न्यत्तरसम्बन्धः, पुनश्चोक्तं वृत्तिशब्दस्य नानार्थाः शास्त्रे प्रसिद्धाः शक्त्यात्मकवृत्तिज्ञानसह.तगंगापदात् जलप्रवाहरुपोऽर्थः लक्षणात्मक वृत्तिज्ञानसंबलितगंगेति पदात् तीररुपात्मकास्यर्थः ज्ञानं जायते। येन व्यापारेण शब्दः स्वीयमर्थं बोधयति सा वृत्तिः कथ्यते। एवं शाब्दबोधे हेतुत्वेन या वृत्तिः गृह्यते सा खलु शब्दव्यापार रुपेति उपर्युक्त– विवेचनात् सारत्वेन स्पष्टा भवति।

शाब्दबोधे वृत्तिः हेतुरिति वैयाकरणाः प्रतिपादयन्ति। प्रसंगतः शाब्दबोधप्रकारकत्वं विवेचनीयमिति समनुभूयते। न्यायसिद्धान्त–मुक्तिावलीकाराः श्रीविश्वनाथपञ्चाननभट्टाचार्यमहोदयाः विषयऽस्मिन् प्रस्तुतवन्तः–

**पदज्ञानं तु करणं, द्वारं तत्र पदार्थधीः।**
**शाब्दबोधः फलं, तत्र शक्तिधीः सहकारणी।।**

शाब्दबोधजनने प्रकारत्वेन अस्यां खलु कारिकायां चत्वारोंऽशाः प्रदत्ताः सन्ति। तत्र प्रथमः खलु– पदज्ञानं तु करणम्। शाब्दबोधे करणत्वेन पदज्ञानं गृह्यते। पदश्रवणे सति पदस्य श्रावणप्रत्यक्षात्मकं भवतीति। तस्य श्रावणप्रत्यक्षात्मकस्य पदस्य स्मरणमेव करणं शाब्दबोधे प्रकारकत्वेन स्वीक्रियते। द्वितीयं द्वारं–तत्र पदार्थधीः– पूर्वं खलु पदपरिचयः ततः पदार्थ बोधः। तस्य पदार्थस्य धीः ज्ञानं स्मरणं शाब्दबोधे द्वारं व्यापारो भवति।

तृतीयं– शाब्दबोधः फलम्,– शब्दसमूहात्मकवाक्यजन्यो यो वाक्यार्थबोधः फलं विद्यते। तदेव फलं न्यायशास्त्रे प्रमा पदेनावगम्यते। चतुर्थम् – तत्र शक्ति धी सहकारिणी – पदजन्यपदार्थस्मरणात्मकः व्यापारः, व्यापार तत्रेति पदस्य तात्पर्यम्। एवम्भूते व्यापारे शक्तिधीः अर्थात् पदेन सह अर्थस्य सम्बन्धरुपायाः वक्ष्यमाणायाः संकेताख्यायाः

---
**अनुरूपी लेखक/संयुक्त लेखक**

ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-15, No.- IV, Issues-26, YEAR- Oct.-Dec.-2022

शक्तेः, धीः सा खलु शक्तधीः स्वीक्रियते। एतादृशी शक्तिधी सहकारणी भवति। सहकारिणीति पदस्य सहकारिकारणमिति व्याख्या किरणावल्याम् अवाप्यते। प्रस्तुत कार्यकारणभावशाब्दबोधे स्वीकाराद् नैयायिकाः पदपदार्थयोः ईश्वरेच्छारुपात्मिकां शक्तिं स्वीकुर्वन्ति। प्रमाणज्ञाः 'अस्माच्छब्दादयमर्थो बोधव्यः, इत्याकारा, इदं पदमिदमर्थंबोधयतु' इत्याकारा वेश्वरेच्छा शक्तिः लाघवात्। सैव शक्तिः संकेतसम्बन्धः। आद्यां सृष्टौ समागताः जनाः जागतिकम् अर्थं दृष्ट्वा कस्मात् शब्दात् कस्यार्थस्य बोधकरणीय इति संशयशीलाः आसन्। तथा प्रतिजनं भिन्नं–भिन्नं विविच्य नैयायिकाः लाधवात् पदपदार्थयोः ईश्वरेच्छाशक्तिं स्वीकुर्वन्ति। सा खलु द्विप्रकारिका–प्रथमा–पदप्रकारकार्थविशेष्यिका, द्वितीया तु अर्थप्रकारकपदविशेष्यिका इति।

वैयाकरणभूषणसारे शक्तिप्रकरणे शक्तेः स्वरुपं निम्नकारिकया स्पष्टीकृता विद्यते–

**इन्द्रियणां स्वविषयेषु अनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।**

इन्द्रियाणां चक्षुश्रोत्रादीनां स्वविषयेषु चाक्षुषेषु घटपटमठादिषु यथाऽनादिर्योग्यता तथैव अर्थैः सह शब्दानामपि तद्बोध कारणरुपात्मिका योग्यता पदपदार्थयोःशक्तिपदेनावगम्यते। परमलघुमञ्जुषाकाराः पदपदार्थयोः वाच्यवाचकभावाखण्डात्किां शक्तिं प्रतिपादयन्ति। तत्रैव पदपदार्थोयोः ईश्वरेच्छारुपात्मिका शक्तिः सैव संकेत सम्बन्धः इति नैयायिकमतस्य खण्डनमपि नागेशः अप्रदर्शयत्। ईश्वरेच्छा सम्बन्धो भवितुं नार्हति यतोहि सम्बन्धः 'सम्बन्धिद्वयभिन्नत्वे सति, द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामको भवति'। समन्वयार्थं घटवद् भूतलमित्यत्र घटरुपसम्बन्धः घटभूतलाभ्यां सम्बन्धिभ्यां भिन्नो तथा संयोगः घटभूतलयोः तस्मात् द्विष्ठः, घटनिरुपितसंयोगश्रयो भूतलमिति विशिष्टबुद्धिनियामकश्च तस्मात् संयोगः सम्बन्धत्वेन स्वीक्रियते। घटशब्दस्याचेतनत्वात् घटनिष्ठा ईश्वरेच्छा न सम्भवति यतोहि ईच्छा चेतनवृत्तिधर्मः तस्मात् पदपदार्थयोः ईश्वरेच्छारुपात्मकः सम्बन्धः नैव युक्त्या युज्यते इति कृत्वा वैयाकरणाः नैयायिकमतसमर्थितां पदपदार्थयोः ईश्वरेच्छां नैवमण्डयन्ति।

एतत् सर्वं समीक्ष्य परमलघुमञ्जुषाकाराः नागेशभट्टाः 'पदपदार्थयोः वाच्यवाचकभावापर्याया' इति समर्थयन्ति। अस्य वाच्यवाचकभावस्य, ज्ञापकं इतरेतराध्यासमूलकं तादात्म्यम् एवं सम्बन्धः इति वैयाकरणां सिद्धान्तः। एतन्मूलकमेव तादात्म्यं भवति। तयोः शब्दार्थयोः आत्मा तदात्मा, तदात्मनः भावः तादात्म्यम् इति। इदं रजतम्। इत्यादिकस्थले इदं पदार्थरजतपदार्थयोः तादात्म्यं तथैव पदपदार्थयोरपि, अयं घटः इत्युदाहरणे तादात्म्याध्यायसमूलकमेव न त यथार्थरुपेण स्वीक्रियते। प्रसङ्गेऽस्मिन् न्यायशास्त्रदिशा केचन टीकाकाराः अनुमानप्रकारं प्रदर्शयन्ति– शब्दार्थौ तादात्म्यवन्तौ, इतरेतराध्यासत्वात्। यत्र–यत्र–इतरेतराध्यासः तत्र–तत्र तादात्म्यमिति व्याप्तिः। यथा रक्तं वस्त्रम्–इत्यादौ गुणगुणिनोः। यत्र न तादात्म्यं तत्र नाध्यासः इति व्यतिरेकव्याप्तिरपि सम्भवति।

'शक्तेरपि कार्यजनकत्वे सम्बन्धस्यैव नियमकत्वात्' इति नागेशवाक्यं विचारणीयमस्ति प्रस्तुत वाक्यात् अवगम्यते यत् शब्दार्थौ भावाखण्डा शक्तिः तदभिन्नः सम्बन्धो भवति, स च इतरेतराध्यासमूलकं तादात्म्यमिति। एतद् तथ्यं समुद्घाटनाय 'दीपादिगतगतप्रकाशकत्व–शक्तावपि आलोकविषयसम्बन्धे सत्येव वस्तुप्रकाशकत्वम् इत्युदाहरणं प्रदर्शयति नागेशः। एकः टीकाकारः अस्याः पंक्तेरपि निम्नविधया तत्त्वं प्रकटयति– "यद्यपि दीपे प्रकाशकत्वशक्तिविद्यते किन्तु सा शक्तिस्तदैव कार्यं जनयति यदा दीपस्य आलोकविषयस्य घटादेश्च संयोगादिसम्बन्धो भवति। स च सम्बन्धः प्रकाशकत्वशक्त्यतिरिक्तः एव। उभयसम्बन्धाभावे सति प्रकाशकत्वशक्तिः स्वकार्यं साधयितुं न समर्था एवमेव अत्रापि घटशब्दादिनिष्ठशक्तिरपि तदैव शाब्दबोधरुपं कार्यं जनयितुं न समर्था। एवमेवात्रापि घटशब्दादिनिष्ठशक्तिरपि तदैव शाब्द–बोधरुपं कार्यं जनयितुं समर्था। यदोभयोः कश्चन सम्बन्धः स्यात् स च सम्बन्धोऽयं तादात्म्यरुप एव स्वीकार्य"।

वाच्यवाचकभावशक्तेः निरुपकत्वेन तादात्म्यस्य सम्भवात् विवक्षितोऽर्थः शक्यः आश्रयत्वेन विवक्षितः शब्दः शक्तः सञ्जाते। शब्दार्थयोः तादात्म्यस्वीकारे नैयायिकाः आपत्तिं प्रदर्शयन्ति यतोहि मधुशब्दोच्चारणे मुखे माधुर्यरसास्वादापत्तिः, वह्निशब्दोच्चारणे मुखेदाहापतिः। अस्य खलु दोषास्य समुद्धाराय वैयाकरणाः तादात्म्ये भेदाभेदोमयनियतम् अंगीकुर्वन्ति। तार्किकमते समागतदोषसमुद्धाराय नागेशः प्रोवाच– 'बौद्ध एवार्थः शक्यः, पदमपि स्फोटात्मकं प्रसिद्धम्, तयोस्तादात्म्यम्'। अत्र शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः इति योगसूत्रस्य स्वारस्यं मनसि निधाय सुधीभिः समुच्यते यत् बुद्धौ स्थिताग्नौ अर्थे दाहकतादिः न संभवति यतो शब्दार्थौ बुद्धिपरिकल्पितौ इति। एवं रीत्या श्लोकम् अश्रृणोत् अथार्थं श्रृणेति, 'ओम् इत्येकाक्षरं ब्रह्म' इत्यादयः व्यवहाराः सञ्जायन्ते। शब्दार्थयोः सामानाधिकरण्येन प्रयोगाः अपि परिलक्ष्यन्ते यथा रामेति द्वयक्षरं नाम मानभङ्गः पिनाकिनः, वृद्धिरादैच् इत्यादयः। परमलघुमञ्जूषाकाराः ईश्वरसंकेत एव शक्तिरिति नैयायिकमतनिम्नतर्केण दूषयन्तिः 'अयमेतच्छक्यः अत्रास्य शक्तिः' अर्थात् अयमर्थः एतत् पदस्य शक्यः, अत्र– अस्मिन् अर्थे अस्य पदस्य शक्तिः एवं भूतस्य ईश्वरसंकेतस्य शक्त्यपेक्षया भिन्नरीत्या प्रसिद्धिसत्वात्। वस्तुतः भगवता अस्यार्थस्यायं वाचकः, अस्मादयमर्थः बोद्धव्यः इति संकेतः साक्षादेव विहितः अस्य ज्ञानन्तु वृद्धव्यवहारादिना सञ्जायते। अत्र विदुषा प्रोच्यते–

**शक्तिग्रहं व्याकरणेपमानकोशाप्तवाक्याद् व्यवहारतश्च।**

ARYAVART SHODH VIKAS PATRIKA
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218
ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-15, No.- IV, Issues-26, YEAR- Oct.-Dec.-2022

**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।**

सर्वे च शब्दाः सर्वार्थाभिधानसमर्थाः इति सर्वैः अर्थैः सह सर्वेषां खलु शब्दानां सम्बन्धः, तस्य सम्बन्धस्य प्रकाशकः ईश्वरसंकेतो विद्यते अस्मिन्नेव सन्दर्भे भर्तृहरिरपि वदति–

**नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।।**

**प्रकारान्तरेण इयं शब्दशक्तिस्त्रिधा, रुढिः योगो योगरुढिश्च रुढिशक्ति–** पदेषु प्रकृतिप्रत्ययाः भवन्ति, तत्र पदे प्रकृतिप्रत्ययाः अवयवाः भवन्ति, तेषामर्थस्य कल्पनां करोति व्याकरणशास्त्रम्। एवं व्याकरणशास्त्रबोधितावयवार्थवोधाभावे समुदायार्थनिरुपिता शक्तिः रुढिः शास्त्रेषु प्रसिद्धा, यथा मणिनुपूरादौ।

**योगशक्ति–** व्याकरणशास्त्रकल्पितावयवार्थनिरुपिता शक्तिः, योगशक्तिरुच्यते। यथा पचतीति पाचकः, अत्र पच्धातोः ण्वुल् प्रत्ययः, प्रकृतिप्रत्ययाभ्यां पाककर्तृत्वार्थस्य बोधो भवति।

**योगरुढिशक्ति–** व्याकरणशास्त्रबोधितावयवार्थान्वित विशेष्यभूतार्थ– निरुपिता शक्तिः, योगरुढिरुच्यते। पंकजपदे अंशद्वयं विद्यते, प्रथमः अंशः पंकज इति, द्वितीयः ज इति, अत्रावयवार्थः पंकात् जायते इति। वस्तुतः पंकात् मीनाः शैवालाः पद्मविशेषपुष्पाणि च जायन्ते किन्तु शास्त्रे पंकजपदेन केवलं पद्मविशेषस्यैवार्थस्य बोधः जायते। मीनादिशैवालादीनां बोधो न भवति। अवयवार्थनिरुपित– समुदायार्थविशेषस्य बोधत्वादेव पंकजशब्दे योगरुढिः स्वीक्रियते वैयाकरणैः। नागेशभट्टः इयं वाच्यवाचकभावरुपात्मिका या शक्तिः सा संयोगादिभिः नानार्थेषु नियम्यते– तत्र हरिवाक्यमपि प्रस्तौति–

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य सन्निधिः।।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिस्वरादयः।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।**

**द्वितीया शक्तिः– लक्षणा– अत्र नैयायिकमीमांकवैयाकरणानां मतानां लक्षणास्वरुप–विषये विमर्शः प्रदर्श्यते–** अत्र तार्किकाः– स्ववाक्य सम्बन्धो लक्षणा। लक्षणे स्वपदेन लाक्षणिकत्वेनाभिमतं पदं गृह्यते, शक्य–इति पदेन प्रथमशक्त्या गृहीतेनार्थेन सह सम्बन्धः सामीप्यादिः स लक्षणा। यथा गंगायां घोषः अत्र लाक्षणिकत्वेन अभिमतं पदं गंगा इति। तस्य गंगापदस्य शक्त्या अर्थः जलप्रवाहः, तस्य जलप्रवाहस्य सम्बन्धः घोषपदार्थेन भवितुं नार्हति' तस्मात् सामीप्यादिवाक्येन गंगातटे घोषः इति अनुभवगम्यार्थस्य बोधो भवति। अस्याः लक्षणायाः सामीप्यसादृश्या धिकरणत्वसम्बन्धाभ्यां भेदद्वयस्य कल्पना क्रियते, गौणी शुद्धा च। प्रकारान्तरेणापि लक्षणा द्विविधा अजहत्स्वार्था जहत्स्वार्था च, जहति परित्यजन्ति स्वानि पदानि यम् अर्थं स जहत्स्वः, जहत्स्वोऽर्थो यस्यां लक्षणायां सा जहत्स्वार्था, जहत्स्वार्था न भवति सा अजहत्स्वार्था। सन्दर्भेऽस्मिन् छत्रिणो यान्ति, कुन्तान् प्रवेशय, काकेभ्यो दधि रक्ष्यताम्, गां वाहीकं पाठय इत्युदाहरणानि प्रसिद्धानि वर्तन्ते।

**मीमांसका–** वाक्ये लक्षणं स्वीकुर्वन्ति। तेषां मते स्वबोध्य सम्बन्धो लक्षण'। अत्र स्वम्– वाक्यादिः, तेन बोध्यो योऽर्थस्तत् सम्बन्धो लक्षणेति समन्वयः। गभीरायां नद्यां घोष इत्यादिवाक्ये तल्लक्षणं संघटयितुं शक्यते। वैयाकरणाः लक्षणां न स्वीकुर्वन्ति। तेषां मते शक्तिर्द्विविधा प्रसिद्धाऽप्रसिद्धा च। सामान्यजनाय प्रसिद्धा शक्तिः। तत्र गंगादिपदानां प्रवाहादौ शक्तिः, आमन्दजनगम्या विद्यते। सहृदयहृदयमात्र गम्या अप्रसिद्धा शक्तिः भवति। गंगापदेन तीरादौ खलु अप्रसिद्धा शक्तिरिति।

**व्यञ्जनाशक्ति–** तृतीया वृत्तिः व्यञ्जना प्रोच्यते। व्यञ्जनापदेन किं गृह्यते– अत्रोच्यते नागेशेन– मुख्यार्थबाधनिरपेक्ष बोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादि– वैशिष्ट्य ज्ञान प्रतिमाद्युद्बुद्धः संस्कार विशेषो व्यञ्जना।

## संदर्भ ग्रन्थ सूची


1. पस्पशाह्निक के महाभाष्ये।
2. परमलघुमञ्जूषा–शक्तिनिरूपणे
3. काव्यप्रकाशः द्वितीय उल्लासः
4. काव्यप्रकाशः द्वितीय उल्लासः
5. न्यायसिद्धान्तमुक्तावली–शब्दखण्डे
6. न्यायसिद्धान्तमुक्तावली–शब्दखण्डे
7. परमलघुमञ्जूषायां शक्तिनिरूपाणावसरे।

**ARYAVART SHODH VIKAS PATRIKA**
RNI TITLED NO. UPBIL04292
RNI REG. NO. UPBIL/2014/66218
ISSN NO.-2347-2944 (Print)
e-ISSN NO.-2582-2454 (Online)
Vol.-15, No.- IV, Issues-26, YEAR- Oct.-Dec.-2022

8. वैयाकरणभूषणसारे शक्तिनिर्णयप्रकरणे।
9. परमलघुमञ्जूषायां शक्तिप्रकरणे।
10. परमलघुमञ्जूषायां शक्तिप्रकरणे।
11. परमलघुमञ्जूषायां शक्तिप्रकरणे।
12. परमलघुमञ्जूषा– भावप्रकाशिका टीका।
13. परमलघुमञ्जूषा– शक्तिनिरुपणे। योगसूत्रं– 1/9
14. ब्रह्मविद्योपनिषद्
15. पा0सू0– 1–1–1.
16. वाक्यपदीये ब्रह्मकाण्डे।
17. वाक्यपदीये
18. परललघुमञ्जूषा
19. परम लघुमञ्जूषा.

*****